श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ त्रयोदशः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ त्रयोदशः सर्गः ॥

प्रसादभाजः प्रतिनिर्गतां तां
    प्रासादतो वासववल्लभायाः।
समग्रशक्तिः समयोपयातः
    प्राणेश्वरीं प्राप्तुमियेष शौरिः॥ १३.१ ॥

तामद्भुतां सिद्धिमिवाद्भुतानां
    सौभाग्यविद्यामिव सद्गुणानाम्।
सत्तामनन्यामिव सद्गुणानां
    यथाश्रुतं प्रैक्षत यादवेन्द्रः॥ १३.२ ॥

अङ्गैरवज्ञातकदम्बगोलैः
    अस्पन्दमन्देन विलोचनेन।
लीलोपशान्त्या लिखितेव साऽभूत्
    दामोदरे दृष्टिपथं प्रयाते॥ १३.३ ॥

पद्माकराणां परिषन्निवेशे
    पर्याप्तचन्द्रायुतकान्तिसारे।
अनन्यलभ्यां लभते स्म तृप्तिं
    तस्या मुखे दृष्टिरतीव शौरेः॥ १३.४ ॥

वाचस्पतित्वं च वनस्पतीनां
    दिव्येतरेषां च दिवस्पतित्वम्।
दातुं क्षमाया दयिते तदानीं
    आज्ञापको नूनमभूदनङ्गः॥ १३.५ ॥

तस्मिन् द्वितीयामिव वैजयन्तीं
    सा च प्रिये साचिविशेषरम्याम्।

कटाक्षमालां निबबन्ध कृष्णे
    कामाधिके कौतुकमेदुराक्षी॥ १३.६ ॥

अलक्ष्यभेदत्रिविधाम्बुजाभैः
    आलक्ष्यशृङ्गारगुणानुबन्धैः।
स्वयंवरस्रग्भिरभावि तस्याः
    कालोदिते कंसरिपौ कटाक्षैः॥ १३.७ ॥

स वैजयन्त्यादिविभावशाली
    निर्व्याजनिष्पन्ननिजानुभावः।
शृङ्गारवीराद्भुतचित्रितात्मा
    रम्यस्तया निर्विविशे रसोऽन्यः॥ १३.८ ॥

आकेकराणामनघस्तदानीम्
    एकक्षणं लक्ष्यमभूत् बहूनाम्।
तस्याः स्थिरानन्दपरिप्लुतानाम्
    अर्थस्पृशामर्धविलोकितानाम्॥ १३.९ ॥

तस्याश्चिराकङ्क्षितलाभधन्यैः
    अपत्रपामन्थरितैरपाङ्गैः।
बभार भूयो बहुमानपूर्वं
    बाल्ये धृतां बर्हिकलापभूषाम्॥ १३.१० ॥

सन्तानसौभाग्यघनेन यूना
    सिक्ता सुधासारनिभैरपाङ्गैः।
उद्भिन्नरोमाञ्चततिर्बभासे
    कान्तप्ररोहा कमलस्थलीव॥ १३.११ ॥

स्वकान्तिसाम्यादिव जातसङ्गैः
    शौरिस्तदा स्वागतसूक्तिगर्भैः।
प्रियासखीनामभजत् प्रहृष्टैः
    उद्वीक्षणैरुत्पलपुष्पवृष्टिम्॥ १३.१२ ॥

स रुक्मिणीनेत्रचकोरचन्द्रः
सा तत्प्रहर्षाम्बुजपूर्वसन्ध्या।
तदद्भुतद्वन्द्वमवेक्ष्य सख्यः
प्रापुस्तुलामप्सरसामनूनाम्॥ १३.१३ ॥

तथैव तादात्म्यमिवाऽऽगतानां
तस्याः सखीनां सममाविरासन्।
परस्य वीक्षां प्रतिसंलपन्तो
वक्रोक्तिगर्भा इव मन्दहासाः॥ १३.१४ ॥

स कौस्तुभाभ्यर्णनिवेशयोग्यं
कन्यामयं कामपयोधिरत्नम्।
परीतमारात् प्रतिहारपालैः
पश्यन् क्षणं पान्थ इवावतस्थे॥ १३.१५ ॥

तं माल्यभूषापरिकर्मिताङ्गं
धारातटित्वन्तमिवाम्बुवाहम्।
समीक्ष्य बाला तदनन्यदृष्टिः
चर्यामवालम्बत चातकानाम्॥ १३.१६ ॥

तलोदरीं तालफलस्तनीं तां
ताम्राधरां चारुनवोत्पलाक्षीम्।
किं नाम भावीति विभावयन्तीं
कृष्णस्तदा किञ्चिदिवाऽऽससाद॥ १३.१७ ॥

दुर्दर्शमध्यां द्विरदेन्द्रयातां
व्यूहक्रमव्यक्तविचित्रगात्रीम्।
परैरभेद्यां प्रतिजग्मुषीं तां
कान्तात्मिकां कामचमूं स मेने॥ १३.१८ ॥

स चन्द्रिकां चन्द्र इवाभियातः
चन्द्राननां यादववंशचन्द्रः।

निर्वेशनीयः सविशेषमासीत्
नेदीयसां नेत्रचकोरबृन्दैः॥ १३.१९ ॥

अहं त्वया दूतमुखेन दूरात्
साध्व्या समाहूत इहोपयातः।
मा ते भयं भूदिति मञ्जुभाषि
तामग्रहीदग्रकरे मुकुन्दः॥ १३.२० ॥

प्रियेण सा तेन गृहीतहस्ता
तद्वक्त्रदिव्याम्बुजषट्पदेन।
विलोचनेन व्यवृणोत् सखीभ्यः
कृतार्थतां क्षीबदशोल्बणेन॥ १३.२१ ॥

प्राचोऽवतारानतिशय्य भूम्ना
सा रुक्मिणी तेन वृता चकाशे।
तस्यैव रूपान्तरदूरवृत्तिः
कन्दर्पजन्मानुगुणेव कान्तिः॥ १३.२२ ॥

मल्लीविकासोज्ज्वलमन्दहासा
रोमोद्गमैराहितकोरकश्रीः।
समेयुषी संददृशे तदा सा
वसन्तलक्ष्मीरिव माधवेन॥ १३.२३ ॥

अघर्मजस्वेदकणावकीर्णाम्
अभीतिजं वेपथुमुद्वहन्तीम्।
अनुष्णबाष्पोदयमन्थराक्षीं
विलोक्य देवीं विभुरभ्यनन्दत्॥ १३.२४ ॥

हरिप्रियां केसरिणीमिवैनां
दुरासदामन्यनृपद्विपेन्द्रैः।
सखीजनः प्रीतमना निदध्यौ
ययौ च खेदं निजविप्रयोगात्॥ १३.२५ ॥

मिथो गुणैस्तन्मिथुनं निबद्धं
    वियोगवैदेशिकसंप्रयोगम्।
अजायतान्योन्यनिलीनभावं
    सखीदृशां सादरदर्शनीयम्॥ १३.२६ ॥

जगत्त्रयार्तिप्रशमाय जातां
    विहारसंक्षोभितवैरिसिन्धुः।
देवेषु पश्यत्स्विव पूर्वमेनां
    जग्राह तां जाग्रति राजलोके॥ १३.२७ ॥

स पुष्पकं राम इव प्रियां स्वाम्
    उत्तारितां शत्रुभयादुदीर्णात्।
मनोजवं सत्यमनोरथस्तां
    आरोपयामास रथं रथाङ्गी॥ १३.२८ ॥

सा चामरौघैरुपचर्यमाणा
    वातावधूतैरिव काशजालैः।
रराज नाथेन रथोदयाद्रौ
    चन्द्रेण पूर्णेन शरन्निशेव॥ १३.२९ ॥

परस्परप्राप्तगुणेन भासा
    बर्हावृतं व्योम विभावयन्तौ।
विरेजतुस्तुङ्गरथाश्रयौ तौ
    विद्युत्पयोदाविव मन्दरस्थौ॥ १३.३० ॥

प्रभेव देवेन तमोपहेन
    प्रत्यग्दिशं तेन सह प्रयान्ती।
नित्यानपायित्वमजानतीनां
    सत्यापयामास निजं प्रजानाम्॥ १३.३१ ॥

तामुद्वहंस्तामरसायताक्षो
    रत्नौघदीप्तेन रथेन देवीम्।

आत्मानमेवार्यममण्डलस्थं
विद्यासखं व्यञ्जयति स्म वीरः॥ १३.३२॥

अतीतदर्शामिव चन्द्रलेखां
शान्तोपरोधामिव शारदीं द्याम्।
अमंस्त निर्विघ्नफलामिवेच्छां
शोकत्यजं शूरकुलेश्वरस्ताम्॥ १३.३३॥

समेत्य सिंहीमिव तामनन्यां
यानोद्यतं यादवपञ्चवक्त्रम्।
आघुष्य गोमायुरिवामिषार्थी
चैद्यः क्रुधा दीप्तमुखोऽन्वधावत्॥ १३.३४॥

रुक्मी च तूर्णं प्रतिपन्नरोषः
पुरो भवन् भूमिभृतां सखीनाम्।
पराभवस्य प्रतिकारमिच्छन्
जग्राह पार्ष्णिं जगदेकनेतुः॥ १३.३५॥

जिघांसिते भ्रातरि जातखेदैः
कान्ताभिलापैः कतकैरिवाम्भः।
मनः प्रपेदे सहजां प्रसत्तिं
सत्त्वाधिकं सात्वतवंशगोप्तुः॥ १३.३६॥

स वीक्षमाणः सविलासनेत्रं
वल्गुस्मितं वामदृशो मुखाब्जम्।
तदुक्तिभिः स्वादुतमाभिरासीत्
आप्यायितो नूनमनाविलाभिः॥ १३.३७॥

अनुद्रुतां वैरिचमूं स वीरो
बलेन रुद्ध्वा निजबाहुनैव।
विनिर्दिशन् मार्गभवान् विशेषान्
विश्वासयामास विदर्भकन्याम्॥ १३.३८॥

प्रियासहायः पदवीं स गच्छन्
    द्राघीयसीं दारुकसारथिस्ताम्।
उदग्रवेगानुदधेरनूपे
    वीतीन् क्षणं विश्रमयांबभूव॥ १३.३९ ॥

भयार्णवादुद्धृतया स्वयाऽसौ
    श्रियेव साक्षादनुभूयमानः।
पयोधिरूपां परिघां विलङ्घ्य
    द्युसंमितां द्वारवतीमयासीत्॥ १३.४० ॥

परिष्कृतां काञ्चनतोरणैस्तां
    वल्गुध्वजां वन्दनदामचित्राम्।
रामासहायः प्रसमीक्ष्य रेमे
    रम्यप्रसूनाञ्चितराजवीथीम्॥ १३.४१ ॥

महीयसां मङ्गलदुन्दुभीनां
    नादैरवज्ञातपयोधिशब्दा।
श्रुतोत्सवानां विदये पुरी सा
    स्वर्गौकसां श्रोत्रसुधामपूर्वाम्॥ १३.४२ ॥

प्रत्येयुषां कंसरिपुर्यदूनां
    देवद्रुमाणामिव जङ्गमानाम्।
अनर्घरत्नाभरणप्रधानान्
    आदत्त दिव्यानुपदाविशेषान्॥ १३.४३ ॥

तस्मिन् महानीलमणिप्रकाशे
    तां रुक्मिणीमाहितरुक्मकान्तिम्।
पुराङ्गनाः प्रेक्षितुमीहमानाः
    स्वर्गाधिकानारुरुहुः स्वसौधान्॥ १३.४४ ॥

कलक्वणन्नूपुरचारुवाद्यं
    कर्णावतंसोदितभृङ्गगीतम्।

कस्याश्चिदन्वागतनाट्यवेदं
    लीलागतं लास्यमभूदपूर्वम्॥ १३.४५ ॥

परिच्युतं किञ्चिदिवान्तरीयं
    काचित्समालम्ब्य सहैव कान्त्या।
क्षिप्तेव तीव्रेण कुतूहलेन
    क्षणेन वातायनमाससाद॥ १३.४६ ॥

आमुच्य ताटङ्कमनङ्गचक्रं
    सव्येतरे सत्वरमाव्रजन्ती।
अन्येन काचिद्भृशमाबभासे
    कर्णेन कैवल्यविभूषणेन॥ १३.४७ ॥

उदञ्चिता बाहुलतेतरस्या
    मौलीस्रजा हस्तगृहीतयाऽऽसीत्।
जगज्जिगीषोर्मदनस्य जैत्री
    पताकयेवाद्भुतकेतुयष्टिः॥ १३.४८ ॥

प्रकोष्ठभाजः प्रियशारिकायाः
    पयः स्वयं सादरमर्पयन्ती।
गावाक्षमागम्य गजेन्द्रयाता
    काचित् प्रसस्मार कृतावशेषम्॥ १३.४९ ॥

प्रचारवेगात् त्रुटितेन चक्रे
    हारेण मुक्ताफलवर्षिणाऽन्या।
अदूरतः सन्निहितस्य शौरेः
    आचारलाजाञ्जलिपूर्वरङ्गम्॥ १३.५० ॥

स्तनांशुकं स्रस्तमबुध्यमाना
    सखीजने सम्मितमीक्षमाणे।
परामृशन्ती विततान काचित्
    प्रतिक्रियां पाणिनखांशुजालैः॥ १३.५१ ॥

सखीधृतैश्चामरतालवृन्तैः
    आश्यानतां प्रापितमङ्गरागम्।
विलोकिते शार्ङ्गिणि विह्वलाऽन्या
    श्वासानिलैः शोषमिवानिनीषत्॥ १३.५२ ॥

प्रसाधयन्तीमवधीर्य धात्रीम्
    अङ्गैरसम्भावितभूषणाऽन्या।
समीक्ष्य कृष्णं सहसोपजातैः
    परिष्क्रियामाद्रियतेव भावैः॥ १३.५३ ॥

भ्रुवा स्फुरन्त्या मदनस्य मौर्वीं
    ज्याघातरेखामभिदर्शयन्ती।
अन्यानुषक्तेऽपि हरौ वियातां
    प्रायुङ्क्त दूतीमिव दृष्टिमन्या॥ १३.५४ ॥

तदीक्षणे भर्तुरिव स्मरन्त्या
    कन्यादशां कामवशाद्व्रजन्त्या।
स्वयंवरार्हे स्वयमेव तस्मिन्
    कयाचिदाधायि कटाक्षमाला॥ १३.५५ ॥

समेयुषीमप्रतिमेन यूना
    तां रुक्मिणीं वीक्ष्य विलीनभावा।
भाग्यं किमस्या इति भावयन्ती
    तदात्मतां नूनमलिप्सतान्या॥ १३.५६ ॥

कक्ष्यानिबन्धच्यवने सलीलं
    स्तनाहितस्वस्तिकबाहुबन्धा।
जगत्पतौ पश्यति जातभीषा
    प्रायस्तदालिङ्गनमभ्यनैषीत्॥ १३.५७ ॥

रथेन तं राजपथे प्रयान्तं
    निर्व्याजसङ्गेन निशामयन्ती।

त्यक्ता निमेषैरपराऽन्वकार्षीत्
चित्राङ्गनानां सुरयोषितां च॥ १३.५८ ॥

समीक्षितस्यापि सहत्वसङ्गात्
दुष्प्रापलोभादपि दूयमाना।
गलद्भिरन्या वलयप्रसूनैः
अभ्यर्चनामातनुतेव शौरेः॥ १३.५९ ॥

समानकान्त्या प्रियया समेते
दृष्टे जगद्धातरि जातरागा।
प्रणामयोग्येयमितीव मत्वा
प्राप्तं पदं मेखलया परस्याः॥ १३.६० ॥

तासां तदेकोत्सुकदर्शनानां
समाधिभाजामिव शेमुषीणाम्।
अलं प्रभुः सोऽपि न मातुमासीत्
अपारहर्षादनघामवस्थाम्॥ १३.६१ ॥

अवारुणीसम्भवसौरभैस्तैः
अनन्यसाध्याधर बिम्बरागैः।
निरञ्जनोपस्थितनेत्रशोभैः
स पिप्रिये पौरवधूमुखाब्जैः॥ १३.६२ ॥

स पौरकन्याकरविप्रकीर्णान्
प्रायः प्रतीच्छन्नुपचारलाजान्।
अचीचरत् स्यन्दनमब्जनेत्रः
सव्यापसव्येन गतेन वीधीम्॥ १३.६३ ॥

कह्लारपद्मोत्पलकान्तिचोरैः
कटाक्षणैः पौरवधूजनानाम्।
मुग्धेन्दुहासो मुमुदे मुकुन्दः
पश्यन् प्रियां प्रापितपुष्पवृष्टिम्॥ १३.६४ ॥

कृष्णस्य तां स्कन्धमुपघ्नयन्तीं
सुरद्रुमस्येव सुवर्णवल्लीम्।
अवेक्ष्य नूनं चतुरः पुमर्थान्
अनन्यलभ्यानलभन्त पौराः॥ १३.६५ ॥

वक्त्रैः सुधासोदरकान्तिपूरैः
कस्तूरिकापत्रकलङ्कदृश्यैः।
अलक्ष्यदेहा विदधुर्मृगाक्ष्यः
प्रत्युप्तपूर्णेन्दुशतान् गवाक्षान्॥ १३.६६ ॥

शुचिस्मिताः सौधतलान्तरस्थाः
पद्मेक्षणं प्रेक्ष्य परिस्फुरन्त्यः।
शरत्पयोदोदरसंश्रितानां
क्षणद्युतीनां द्युतिमन्वविन्दन्॥ १३.६७ ॥

अपाङ्गजालैरसितोत्पलाभैः
कृष्णात्मकं भावमिवोद्वमन्त्यः।
वितेनिरे राजपथे मृगाक्ष्यः
तदादृतां बर्हवितानशोभाम्॥ १३.६८ ॥

हरेरभिख्यामनुपाधिरम्यां
विलोचनैर्वीतनिमेषविघ्नैः।
आस्वादयन्त्यः सुदृशस्तदानीं
अयत्ननिष्पीतसुधा इवाऽऽसन्॥ १३.६९ ॥

अम्भोरुहाणामवलेपसीमां
कर्णोत्पलानामपि कान्तिकक्ष्याम्।
विलङ्घयन्तः सुदृशां कटाक्षा
विलिल्यिरे कृष्णमवाप्य लक्ष्यम्॥ १३.७० ॥

तमात्मवन्तं परविद्ययेव
पराक्रमं तत्परयेव लक्ष्म्या।

तमेव देवं दययेव जुष्टं
संमेनिरे तत्त्वविदः सभार्यम्॥ १३.७१ ॥

तां प्राप्य चित्रामिव तारकेशः
स्तव्यैः स्तुतो वन्दिगणैरभौमैः।
विवेश धाम स्वमुदीर्णधामा
वैवाहिकीं सम्पदमाप्तुमिच्छन्॥ १३.७२ ॥

विहारयोगेन विभज्य युक्तं
मिथोऽनुरूपं मिथुनं तदाद्यम्।
उपाचरन् व्योमचरा यथार्हं
संप्रीणनैरुत्सवसंविधानैः॥ १३.७३ ॥

सदाऽभिगम्यैरभिगम्यमानं
विश्राणने वैश्रवणात् प्रभूतम्।
तं शङ्खपद्मप्रमुखा महान्तः
सिषेविरे शेवधयः समेताः॥ १३.७४ ॥

अकृत्स्नसंवेदिनि जीवलोके
संग्राहयन् धर्ममथात्मवृत्त्या।
प्रत्यर्चयामास मुनीनुपेतान्
प्रभुः स्वयं प्रेष्य इवोपचारैः॥ १३.७५ ॥

अपत्रपाविप्लुतचेतसो ये
त्यक्त्वा विपक्षं तरसोपसेदुः।
यथाक्रमं सात्यकिरुत्सवादौ
संभावयामास सभासदस्तान्॥ १३.७६ ॥

शुभंयवः स्वामिमहोत्सवेन
स्वाराज्यमक्षय्यमिवाप्तवन्तः।
दत्तोपचारा वसुदेवदारैः
पुण्याशयाः पौरजना जहर्षुः॥ १३.७७ ॥

सहोदरन्यस्तभरस्तदात्मा
रुक्माणि रत्नानि च रौहिणेयः।
अदत्त सन्तोषवशादभीक्ष्णं
वाञ्छाधिकं वन्दिवनीपकानाम्॥ १३.७८ ॥

अनन्यभक्तैरनुभाव्यभूम्ना
दत्तेक्षणो दानपतिस्त्रिधाम्ना।
समाहितैः संमतमुद्धवाद्यैः
पुरोधसां पूजनमाचचार॥ १३.७९ ॥

आहन्यमाना धृतहेमकोणैः
गन्धर्वमुख्यैरिव गाढविद्धैः।
जातानुनादा जगतां त्रयाणां
दोषच्छिदो दुन्दुभयः प्रणेदुः॥ १३.८० ॥

विभावितं शिक्षितनाट्यवेदैः
उद्वाहसंगीतमुदारक्लृप्तम्।
प्रसादनं दृष्टिमनश्श्रुतीनाम्
अदिव्यमास्कन्दितदिव्यमासीत्॥ १३.८१ ॥

लावण्यपूरं ललिताङ्गयष्टेः
कात्स्न्र्येन निर्वेष्टुमपारयन्त्यः।
अङ्गानि वध्वाः कुलवृद्धनार्यः
प्रसाधनैरन्तरयांबभूवुः॥ १३.८२ ॥

प्रयुज्यमानानि तयोर्यथार्हं
मङ्गल्यमाल्याभरणाक्षतानि।
प्रायेण लोकाभ्युदयं प्रदातुं
तत्सङ्गमात्तादृशतामकाङ्क्षन्॥ १३.८३ ॥

अरातिपक्षार्णवमन्दराभे
हस्ते हरेर्यत्तदबन्धि सूत्रम्।

तदाददे स्थानवशादभिख्यां
संवीतनागेन्द्रनिदर्शनीयाम्॥ १३.८४ ॥

समेधितस्तस्य विवाहवह्निः
पुरोधसा पुण्यकृदग्रिमेण।
प्रदक्षिणावृत्तशिखाकलापः
प्रायेण नीराजनमाततान॥ १३.८५ ॥

आशास्य लाजाञ्जलिहोमभाजा
क्षेमाशिषा किञ्चिदशेषहृद्यम्।
अन्योन्यमाकेकरसस्मिताक्षा-
वपश्यतामादिमदम्पती तौ॥ १३.८६ ॥

वैलक्ष्यडोलामिव संश्रितानां
विलोचनानां ववृधे विहारैः।
तयोरनन्यादृशवैभवानाम्
अन्योन्यराजीवमधुव्रतानाम्॥ १३.८७ ॥

परस्परं पाणिसरोजयोगात्
बभूवतुस्तौ पुलकाञ्चिताङ्गौ।
अस्विद्यतां च ज्वलनस्तु मन्दैः
असूत धूमैरधिवासमात्रम्॥ १३.८८ ॥

समन्त्रकं साक्षिणि हव्यवाहे
सख्योचितां सप्तपदीं भजन्तौ।
स्वशासनेन स्वयमन्वयाताम्
आचारमागन्तुकदम्पतीनाम्॥ १३.८९ ॥

अन्वेतु विष्णुः स्वयमित्युदीर्य
प्रियां पराधीन इवानुगच्छन्।
जायापतीनां जगदुद्भवानां
भव्यां दशां भावयति स्म नाथः॥ १३.९० ॥

आत्मानमेव स्वयमग्निरूपं
 परिक्रमैः पर्यचरत्स देवः।
विश्वस्य बाह्यान्तरनित्यवृत्त्या
 न कर्म कर्ता च य एव एषाम्॥ १३.९१ ॥

प्रदक्षिणेन क्रमणेन ताभ्यां
 दत्तार्चनो दिव्यवधूवराभ्याम्।
नूनं तथाऽऽनर्च विधूर्णनेन
 स्वान्तः स्थितौ वह्निरपि स्वयं तौ॥ १३.९२ ॥

तस्याः सलीलं चरणारविन्दं
 कामी गृहीत्वा करपङ्कजाभ्याम्।
आस्थापयद्यां दृषदं मुकुन्दः
 साऽभूत् स्वयं मौलिमणिः श्रुतीनाम्॥ १३.९३ ॥

यदत्र कर्मण्ययथाकृतं तत्
 स्विष्टं क्रियादग्निरिति ब्रुवाणः।
स्वतेजसा भावितविश्वतेजाः
 स्वाहासखं देवमुपास्त देवः॥ १३.९४ ॥

रामस्य सीतेव रमेव विष्णोः
 अमुष्य भूयास्त्वमिहैकपत्नी।
इत्यूचिषो यादववृद्धदारान्
 प्रीताशया प्रैक्षत सा सनाथा॥ १३.९५ ॥

वरेण वन्द्येन सुरासुराणां
 मङ्गल्यसीमान्तभुवा च वध्वा।
समीक्षिता ब्रह्मसुतस्य पत्नी
 सर्वैरभूत् सादरदर्शनीया॥ १३.९६ ॥

तदेकभावा तमनन्यभावं
 नाथप्रिया नाथमनुव्रजन्ती।

अभीष्टसिद्धेरधिदेवतेयं
    यद्वा सवित्रीति यथार्थमूचे॥ १३.९७ ॥

कृताशिषं कृष्णगृहेश्वरीं तां
    पुरोधसा पुण्यमनोरथेन।
सकौतुकां कौतुकिनः सुरत्नैः
    अभ्यर्चयामासुरमात्यवृद्धाः॥ १३.९८ ॥

मनुष्यतां मानयतो विहारैः
    स्वामेव देवीमुपयच्छतस्ते।
समेधतां मङ्गलमित्युशन्तः
    सत्याशिषस्तं मुनयः शशंसुः॥ १३.९९ ॥

प्रदाय ताभ्यामुपदाः समीचीः
    प्रत्यागताः स्वानि गृहाणि पौराः।
आशापतीनां विभवादनूनां
    तत्रैव ते सम्पदमन्वभूवन्॥ १३.१०० ॥

स्त्रीपुंसनाम्ना बहुधा विभक्तं
    विश्वं ययोरेव विभूतिमाहुः।
नयो जहौ द्वारवतीं न ताभ्याम्
    अङ्गीकृतामादिमदम्पतीभ्याम्॥ १३.१०१ ॥

वधूसखे तत्र जगन्निवासे
    वसत्यमर्यादगुणानुभावे।
तस्मिन्निवाऽऽसीदनपायभावा
    तस्यां नगर्यामपि रुक्मिणी श्रीः॥ १३.१०२ ॥

तस्याः कटाक्षैर्विहिताभिषेकः
    तद्बाहुना कल्पितकण्ठमाल्यः।
अवाप शोभामधिकां मुकुन्दः
    सौभाग्यसिंहासनसार्वभौमीम्॥ १३.१०३ ॥

कदम्बगोलश्रियमाक्षिपन्तं
    कन्दर्परूपोदयपूर्वरूपम्।
प्रियापरिष्वङ्गरसेन धन्यं
    प्रीताशयो बह्वमतात्मदेहम्॥ १३.१०४ ॥

तां प्राप्य कृष्णः प्रभुतामिव स्वां
    मनःप्रसूतेरिव मन्त्रसिद्धिम्।
आसीदभीतैः सहसाऽभिगम्यो
    मित्रैरमित्रैरपि सापराधैः॥ १३.१०५ ॥

श्रीवत्ससंस्थानजुषा प्रकृत्या
    स्थानेन चिह्नेन च लक्षणीयौ।
दृष्टावभीष्टं भजतां ददाते
    जगत्पती ताविह दम्पती द्वौ॥ १३.१०६ ॥

न ते मनुष्या न च देवतास्ते
    प्रायेण तावेव तथाभवन्तौ।
यैरेवमन्योन्यविभूषितं तत्
    द्वन्द्वातिगं द्वन्द्वमवैक्षि धन्यैः॥ १३.१०७ ॥

अथ समुदितहर्षैरादृतो मन्त्रिवृद्धैः
    सुरपतिदयिताभिः स्तूयमानापदानः।
रुचिमिव निरपायां रुक्मिणीं प्राप्य हृष्यन्
    यदुपतिरधिचक्रे यायजूकाधिकारम्॥ १३.१०८ ॥

सुभगमुपलबिम्बे शातकुम्भेऽपि रत्नं
    कनति विपिनभागे कालकण्ठेऽपि गङ्गा।
वशिकनृपगृहे सा वासुदेवेऽप्यदीव्यत्
    न हि भवति विशेषः क्वापि नित्योन्नतानाम्॥ १३.१०९ ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य

श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य

कृतिषु यादवाभ्युदये माहाकाव्ये

त्रयोदशः सर्गः ॥